अथ ते संप्रवक्ष्यामि
स्वरूपं परमात्मनः ।
यद्विज्ञाय नरो बन्धान्
मुक्तः कैवल्यमश्नुते ॥ १२४ ॥

atha te sampravakṣyāmi
svarūpaṁ param-ātmanaḥ
yad vijñāya naro bandhān
muktaḥ kaivalyam aśnute

अस्ति कश्चित्स्वयं नित्यम्
अहंप्रत्ययलम्बनः ।
अवस्थात्रयसाक्षी सन्
पञ्चकोशविलक्षणः ॥ १२५ ॥

asti kaścit svayaṁ nityam
aham-pratyaya-lambanaḥ
avasthā-traya-sākṣī san
pañca-kośa-vilakṣaṇaḥ

यो विजानाति सकलं
जाग्रत्स्वप्नसुषुप्तिषु ।
बुद्धितद्वृत्तिसद्भावम्
अभावमहमित्ययम् ॥ १२६ ॥

yo vijānāti sakalaṁ
jāgrat-svapna-suṣuptiṣu
buddhi-tad-vṛtti-sad-bhāvam
abhāvam ahamity ayam

यः पश्यति स्वयं सर्वं
यं न पश्यति कश्चन ।
यश्चेतयति बुद्ध्यादि
न तद्यं चेतयत्ययम् ॥ १२७ ॥

yaḥ paśyati svayaṁ sarvaṁ
yaṁ na paśyati kaścana
yaś cetayati buddhyādi
na tad yaṁ cetayaty ayam

प्रकृतिविकृतिभिन्नः शुद्धबोधस्वभावः
सदसदिदमशेषं भासयन्निर्विशेषः ।
विलसति परमात्मा जाग्रदादिष्ववस्था-
स्वहमहमिति साक्षात्साक्षिरूपेण बुद्धेः ॥ १३५ ॥

prakṛti-vikṛti-bhinnaḥ śuddha-bodha-svabhāvaḥ
sad asad idam aśeṣaṁ bhāsayan nirviśeṣaḥ
vilasati param-ātmā jāgrad-ādiṣv avasthā-
svaham aham iti sākṣāt sākṣi-rūpeṇa buddheḥ

अत्रानात्मन्यहमिति मतिर्बन्ध एषोऽस्य पुंसः
प्राप्तोऽज्ञानाज्जननमरणक्लेशसंपातहेतुः ।

atrānātmany aham iti matir
bandha eṣo 'sya puṁsaḥ
prāpto 'jñānāj janana-maraṇa-
kleśa-sampāta-hetuḥ

येनैवायं वपुरिदमसत्सत्यमित्यात्मबुद्ध्या
पुष्यत्युक्षत्यवति विषयैस्तन्तुभिः कोशकृद्वत् ॥ १३७ ।

yenaivāyaṁ vapur idam
asat satyam ity ātma-buddhyā
puṣyaty ukṣaty avati viṣayais
tantubhiḥ kośakṛdvat

अखण्डनित्याद्वयबोधशक्त्या
स्फुरन्तमात्मानमनन्तवैभवम् ।
समावृणोत्यावृतिशक्तिरेषा
तमोमयी राहुरिवार्कबिम्बम् ॥ १३९ ॥

akhaṇḍa-nityādvaya-bodha-śaktyā
sphurantam ātmānam ananta-vaibhavam
samāvṛṇoty āvṛti-śaktir eṣā
tamomayī rāhur ivārka-bimbam

तिरोभूते स्वात्मन्यमलतरतेजोवति पुमान्
अनात्मानं मोहादहमिति शरीरं कलयति ।
ततः कामक्रोधप्रभृतिभिरमुं बन्धनगुणैः
परं विक्षेपाख्या रजस उरुशक्तिर्व्यथयति ॥ १४० ॥

tirobhūte svātmany amalatara-tejovati pumān
anātmānaṁ mohād aham iti śarīraṁ kalayati
tataḥ kāma-krodha-prabhṛtibhir
amuṁ bandhana-guṇaiḥ
paraṁ vikṣepākhyā rajasa uru-śaktir vyathayati

एताभ्यामेव शक्तिभ्यां
बन्धः पुंसः समागतः ।
याभ्यां विमोहितो देहं
मत्वाऽत्मानं भ्रमत्ययम् ॥ १४४ ॥

etābhyām eva śaktibhyāṁ
bandhaḥ puṁsaḥ samāgataḥ
yābhyāṁ vimohito dehaṁ
matvā 'tmānaṁ bhramaty ayam

बीजं संसृतिभूमिजस्य तु
तमो देहात्मधीरङ्कुरो
रागः पल्लवमम्बु कर्म तु वपुः
स्कन्धोऽसवः शाखिकाः ।

bījaṁ saṁsṛti-bhūmijasya tu
tamo dehātmadhīr aṅkuro
rāgaḥ pallavam ambu karma tu vapuḥ
skandho 'savaḥ śākhikāḥ

अग्राणीन्द्रियसंहतिश्च विषयाः
पुष्पाणि दुःखं फलं
नानाकर्मसमुद्भवं बहुविधं
भोक्तात्र जीवः खगः ॥ १४५ ॥

agrāṇīndriya-saṁhatiś ca viṣayāḥ
puṣpāṇi duḥkhaṁ phalaṁ
nānā-karma-samudbhavaṁ bahu-vidhaṁ
bhoktātra jīvaḥ khagaḥ

श्रुतिप्रमाणैकमतेः स्वधर्म-
निष्ठा तयैवात्मविशुद्धिरस्य ।
विशुद्धबुद्धेः परमात्मवेदनं
तेनैव संसारसमूलनाशः ॥ १४८ ॥

śruti-pramāṇaika-mateḥ svadharma-
niṣṭhā tayaivātma-viśuddhir asya
viśuddha-buddheḥ param-ātma-vedanaṁ
tenaiva saṁsāra-samūla-nāśaḥ

मुञ्जादिषीकामिव दृश्यवर्गात्
प्रत्यञ्चमात्मानमसङ्गमक्रियम् ।
विविच्य तत्र प्रविलाप्य सर्वं
तदात्मना तिष्ठति यः स मुक्तः ॥ १५३ ॥

muñjād iṣīkām iva dṛśya-vargāt
pratyañcam ātmānam asaṅgam akriyam
vivicya tatra pravilāpya sarvaṁ
tad-ātmanā tiṣṭhati yaḥ sa muktaḥ

देहोऽयमन्नभवनोऽन्नमयस्तु कोशः
चान्नेन जीवति विनश्यति तद्विहीनः ।
त्वक्चर्ममांसरुधिरास्थिपुरीषराशिः
नायं स्वयं भवितुमर्हति नित्यशुद्धः ॥ १५४ ॥

deho 'yam anna-bhavano 'nnamayas tu kośaḥ
cānnena jīvati vinaśyati tad-vihīnaḥ
tvak-carma-māṁsa-rudhirāsthi-purīṣa-rāśiḥ
nāyaṁ svayaṁ bhavitum arhati nitya-śuddhaḥ

पूर्वं जनेरधिमृतेरपि नायमस्ति
जातक्षणः क्षणगुणोऽनियतस्वभावः ।
नैको जडश्च घटवत्परिदृश्यमानः
स्वात्मा कथं भवति भावविकारवेत्ता ॥ १५५ ॥

pūrvaṁ janer adhimṛter api nāyam asti
jāta-kṣaṇaḥ kṣaṇa-guṇo 'niyata-svabhāvaḥ
naiko jaḍaś ca ghaṭavat paridṛśyamānaḥ
svātmā kathaṁ bhavati bhāva-vikāra-vettā